दुपायंनैवतज्जये। कारयित्वाप्यतस्तस्यातिरस्कारोमखो गतः ३ इतिश्रीभा० प० शं० मं० सप्तमेऽध्यायेसप्तम वेणी ॥७॥ श्लो० ॥ ८ ॥

श्रोतार ऊचुः॥ प्राप्तकालोनृपोऽपृच्छन्मुनिम्बुस्मंक थंगुरो। कथाप्रश्नम्परित्यज्य हरेर्नारायणस्य च १ वाचक उवाच ॥ आत्मार्थंसज्जनाः कर्मनकुर्वन्तिकदा पिच। नदीगिरितरूणाम्वै स्वाभावमिवसोनृपः २ तवबलिकी यज्ञमें विचार कियाकि जबइन्द्र अपने गुरुको अनादर करैगा तब इन्द्रको बलि जीतैगा इस उपायसे दू-सरा उपाय इन्द्रके जीतने का नहीं है ऐसा विचारिकै बलि की यज्ञ इन्द्रको मोहिकै इन्द्रसे बृहस्पतिको अनादर कराय कै चलागया इस कारणसे उस दिन इन्द्रगुरुको अनादर किया ३ इति भा० प० शं० मं० सप्तमेऽध्याये सप्तमवेणी ॥ ७ ॥ श्लो० ॥ ८ ॥

श्रोतापूछते भए राजा परीक्षित् को मरण नगीच आया था तब राजा भगवान्की कथाको पूछनातौ छोड़ि दिया नारायण वर्म क्यों मुनिसे पूंछा नारायण वर्मतौ शरीर की रक्षा है सोशरीरतौ राजाका छूटने वाला फिरि क्यों पूंछा १ वाचक बोले सज्जन पुरुष अपने सुख होने वास्ते कुछभी कर्म्म नहीं करते दूसरे को सुख होने वास्ते काम करते हैं राजा परीक्षित् नदीको पर्वतको वृक्षको स्वभाव ग्रहण किया जैसी नदी राति दिन जलसे भरी रहती है पण अपने वा-स्ते नहीं भरी रहती है दूसरे जीवोंको सुख देने वास्ते जल से भरी रहती है तथा पर्वत चारा लकड़ी आदि अनेक वस्तु अपने ऊपर राखता है परंतु अपने वास्ते नहीं दूसरे जीवों को सुख देने वास्ते जैसा वृक्ष दूसरे वास्ते फलपत्ता

सुखायसर्वजीवानां पप्रच्छकरुणापरः ३ इतिश्रीभा० ष० शं० मं० अष्टमेऽध्यायेअष्टमवेणी॥ ८ ॥ श्लो० ॥ २ ॥

श्रोतार ऊचुः॥ ववृधेसततम्वृत्तश्चतुर्दिक्षुकथंगुरो। इषुमात्रंमहाश्चर्यमिदंचकौतुकंकिमु १ वाचक उवाच॥ इषुशब्दोत्रचापश्च विद्वद्भिर्नचगृह्यते। इषीकेषुश्चस म्प्रोक्ता विश्वकोशादिमंडले २ मात्रंस्थूलमितिप्रोक्त मिषीकास्थूलसंचयः। दिनेदिनेसोववृधेन तुचापप्रमा णतः ३ इतिश्रीभा० ष० शं० मं० नवमेऽध्यायेनवम वेणी॥ ९॥ श्लो०॥ १३॥

फल आदि राखते हैं तैसा परीक्षित् भी २ आपुतो मरबे योग्य होगया परंतु सबजीवों को सुख होने वास्ते नारायण वर्म पूंछे हैं ३ इति० भा० ष० शं० मं० अष्टमे ऽध्याये अष्ट-मवेणी ॥ ८ ॥ श्लोक ॥ २ ॥

श्रोता पूछते भये कि पूर्व पश्चिम दक्षिण उत्तर इनचारों दिशा की तरफ नित्य चारि चारि हाथ सोरह १६ चारों तरफ वृत्रासुरकी देह बाढ़तीथी रोज यह बात बड़े आश्च-र्य की है तमाशासरीके मालूम परता है क्यों वर्ष १ को हिसा-ब जोडो तौ कितनी मोटी देह होवैगी और वृत्रासुरतो लाखों वर्ष जीता रहा तब कैसी देह भई होगी हर ३ वाचक बोले इषुमात्र इस श्लोक में विद्वान् जन इषुको बाण नहीं कहते क्योंकि विश्वकोश कमंडलुकोश आदि कोशों में इषु को सींकभी लिखते हैं २ मात्रको मोटा अर्थ लिखते हैं इस प्रमाणसे इषुमात्र कहे सींकसरी के ज्यादा वृत्रासुर की देह नित्य चारों तरफ बाढ़तीथी चार हाथ प्रमाण एक धनुषको

टीप--सींक कांसकी सलाई को कहते हैं-

श्रोतार ऊचुः ॥ विश्वरूपस्सुरानूचेसः शोच्यस्स्थावरैरपि। शोकादृषोनवृक्षाणां कथंशोचन्तितेनरान्‌ १ वाचकउवाच ॥ स्थावरास्तरवःप्रोक्ता नान्यत्रभगवत्पदात्‌। स्थापयन्तिमनोयेते मुनयःस्थावराःस्मृताः। तेऽपिशोचन्तिमुनयस्त्वाष्टेनभाषितंनरम्‌ २ इति० भा० ष० शं० मं० दशमेऽध्यायेदशम वेणी॥१०श्लो०॥८॥

श्रोतार ऊचुः ॥ वृत्रासुरस्यशब्देन लोकाश्चासन्‌विचेतसः। कथमेतच्छुकेनोक्तं लोकाश्चबहुविस्तृताः १ है सो धनुष प्रमाण माने चारि हाथ नहीं नित्य देह बाढ़तीथी ३ इति भा० ष० शं० मं० नवमे ऽध्याये नवमवेणी॥ ९ ॥ श्लोक ॥ १३ ॥

श्रोता पूछते भये विश्वरूप देवतों से कहेकि ऐसे प्राणी को वृक्षभी शोच करते हैं कि इसकी सुंदरि गति किस प्रकार से होगी यहबड़ा दुष्ट है तो यह शंका होती है कि वृक्षतौ जड़ हैं उनको तो किसी बातको शोच आदिलेके जो दुःख सुख सो नहींहै फिरि वोवृक्ष मनुष्यको शोच क्योंकरैंगे १ वाचक बोले (सश्शोच्यस्थावरैरपि) इस श्लोक में व्यासजी वृक्षों को स्थावर नहीं कहेथे भगवान्‌ के चरणों में जो मुनि लोग नित्य मनको टिकाते हैं तिनको व्यासजी स्थावर कहेथे ऐसे मुनिजन जो हैं सो विश्वरूप करिके कहाजो मनुष्य तिसका शोच करते हैं २ इति भा० ष० शं० मं० दशमे ऽध्याये दशमवेणी ॥ १० ॥ श्लोक ॥ ८ ॥

श्रोता पूछते भए शुकदेवजी परीक्षित्‌ से कहेकि हे राजन्‌ वृत्रासुरके शब्द करिके सब लोक व्याकुल होगया ऐसा वाक्य सुनिके बड़ी शंका होतीहै क्योंकि लोकतो बहुत हैं वृत्रासुर कैसा शब्द किया जिस करिके सबलोक व्याकुल होगया

तथापिविष्णुर्भगवान् विरंचिशंकरोगुरौ। महात्मानश्च मुनयो लोकेष्वेवसन्तिच २ वाचकउवाच॥ लोक शब्दःप्रजावाची लोकोलोकोपिकथ्यते। युद्धस्यपरितो लोकास्संस्थितास्तेविचेतसः ३ इतिश्रीभा० ष० शं० मं०एकादशेऽध्यायेएकादशवेणी॥ ११॥ श्लो०॥ ६॥

श्रोतार ऊचुः॥ यावच्छिच्छेदवृत्तस्य मूर्द्धानमयनद्वयम्। तावद्व्यतीतवंज्रस्तु महदाश्चर्यकौतुकम् १ चतुर्युगेबभूवुश्च राक्षसानेकशोगुरो। नकेषामीदृशंकर्म श्रुतमस्माभिरुत्तमम् २ वाचक उवाच॥ नह्यत्रज्योतिषामर्थो

यह बड़ी शंका है १ जो सबलोक शब्द से व्याकुल भये तो लोकईमें तौविष्णु ब्रह्मा शिव ऋषि बड़े बड़े महात्मा मुनि येसबरहतेहैं तो ये सब जन व्याकुल होगये होवेंगे २ वाचक बोले लोकशब्द लोकको नहीं मुनियोंने कहेहैं तथा प्रजाकोभी लोक मुनिजन कहतेहैं सब लोकको व्यास जी ऐसा कहेहैंकि इन्द्र वृत्रासुर के युद्धके चारों तरफ जो लोक कहे प्रजा सोसब व्याकुलहोगये सब लोकको व्याकुल होने वास्ते व्यास जी नहीं कहेथे ३ इति० भा० ष० शं० नि० मं० एकादशेऽध्याये एकादश वेणी॥ ११॥ श्लोक॥ ६॥

श्रोता पूछते भये इंद्रको बज्र वृत्रासुरके मस्तकको बारह महीनेमें काटा यह बड़े आश्चर्य की बातहै १ हे गुरुजी सतयुग,त्रेता,द्वापर,कलियुग इन चारों युगमें अनेक राक्षस भयेहैं परंतु किसीके मस्तक काटने में महीना बारा १२ नहीं बीता हम सब किसी शास्त्रमें ऐसा आश्चर्य सुना भी नहीं २ वाचक बोले(ज्योतिषां अयने) इस श्लोक में ज्योतिष को अर्थ ज्योतिष शास्त्र नहीं व्यास किये ज्योतिषको अर्थ ऐसा

ज्योतिश्शास्त्रस्य गृह्यते। ज्योतिषान्नेत्रदीप्तीनाङ्घ्रिविष्णु पादौसुकोमलौ ३ अयनौमुनिभिः प्रोक्तौ यावत्तौतेनवी क्ष्यते। अहर्गणक्षणेतावद्वज्ञश्चिच्छेदतच्छिरः ४इति० ष० शं० मं० द्वादशेऽध्यायेद्वादशवेणी १२ श्लो० ३३॥

श्रोतार ऊचुः॥ ऋषिभिर्महदाश्चर्य मुक्तमिष्ट्वा हरिम्प्रभो। हयमेधेनमुच्येत चराचरवधादपि १ पितृगो गुरुमातृघ्नो ब्रह्मघ्नः श्वानभक्षकः। चांडालोपिविमुच्येत तद्यज्ञेनशचीपते २ वाचक उवाच॥ नीतिशास्त्रेषुवेदेषु पुराणेष्वपिसर्वशः। आत्मघातेशिशोर्घाते धेनुस्त्रीघातके व्यासजी किहेहैंकि ज्योतिष जो आंखों का प्रकाश तिसको अयने मानें स्थान भगवान्को कोमल २ पगहै ३ सोई भगवान् के पगको मरते वखत वृत्रासुर जबतक देखने लगा तबतक राति दिनके एक २ क्षणमें वह वृत्रासुरके मस्तक को वज्रेनकाटिडाला ऐसा अर्थ व्यासजीने किहेथे बारहमास १२ नहीं किये ४ इतिश्री भा० ष० शं० नि० मंजर्य्यां द्वादशे ऽध्याये द्वादश वेणी १२॥ श्लोक॥ ३३॥

श्रोता पूछते भये कि मुनियोंने इन्द्रसे बड़े आश्चर्य की बात कहेहैं कि हेइन्द्र तीनलोक चौदह भुवन में जो चरअचर जीवहैं तिनको मारि डाले फिरि अश्वमेध यज्ञकरिके भगवान्को पूजनकरैगा तो पेश्तर कहेहुयेजोजीवतिनकीहत्यासे छूटिजावेगा १ तथापिता गुरुमातांकोमारिडालैब्राह्मणको मारि डालैकुत्ता आदि जीवों को खायलेवै ऐसाचांडाल होवैतोभी हे इन्द्र अश्वमेध यज्ञकरिके पापसे छूटि जावैगा हे गुरुजी ऐसा वचन कहना मुनिको नहीं है चंडालको है तथा सुनने वालाभी चंडाल है हर३ ऐसा अन्याय मुनिहोके बोलना २

तथा ३ नानृतम्बिब्रुवन्पापी भवेदितिविचार्य्यच । लोभयित्वासहस्राक्षमनृतोक्तेनब्राह्मणाः ४ वृत्रेणदुःखितम्बीक्ष्य विश्वमेतच्चराचरम् । घातयित्वासुरेशेन तम्बभूवुःसुखान्विताः ५ इतिश्रीभा० ष० शं० मं० त्रयोदशेऽध्यायेत्रयोदशवेणी ॥ १३ ॥ श्लो० ७ से ९ तक ॥

श्रोतार ऊचुः ॥दशलक्षास्त्रियोराज्ञश्चित्रकेतोःप्रवर्णिताःशुकेनैवकथम्ब्रह्मन् तासांरत्यादिपोषणम् १ वाचक उवाच ॥ चित्ररूपाःस्त्रियस्सर्वाश्चित्रिताश्चित्रकेतुना।

वाचक बोले नीति शास्त्र में वेदमें पुराण में धर्मशास्त्र में ऐसा लिखाहै कि अपने शरीर को नाश होता होवै तथा बालक माराजाता होवै तथा गौमारी जाती होवै स्त्रीमारीजाती होवै और झूठबोलसे येसब बचिजावैं तौ झूठ बोलिकै इनसबके प्राणकी रक्षा करना वह झूठ नहीं लिखाजावैगा ३ ऐसा ब्राह्मणोंने विचारि कै इन्द्रको यज्ञका लोभ देखाय कै झूठा बचन बोलिकै इन्द्रकरिकै वृत्रासुर को मराते भये ४ क्यों कि वृत्रासुर ने तीनलोक चर अचर सब को दुःखदेरहा है तीनलोक की रक्षा करने वास्ते गनती से हीन जीवों की रक्षा करने वास्ते झूठ बोलिकै इन्द्रसे वृत्रासुर को मराय के सब सुखी होतभये इसवास्ते अश्वमेध की तारीफ इन्द्रसे मुनिजन करते भये ॥ ५ ॥ इति० भा० ष० शं० मं० त्रयोदशेऽध्यायेत्रयोदशवेणी ॥ १३ ॥ श्लोक ॥ ७ ॥से९ तक ॥

श्रोता पूछते भये हेगुरु जी राजा चित्रकेतुकेदश१०००००० लाखस्त्री परीक्षित्से शुकदेव जी कहेकि हे परीक्षित् चित्रकेतु राजा के दशलाखस्त्री थीं तब उनस्त्रियों को रति आदिकके और अनेक प्रकारको पोषण भरण कैसा होताथा बड़े

स्वप्रासादेस्वक्रीडार्थं चित्रज्ञेनपृथक्पृथक् २ जाना
तिचित्रविद्याश्च चित्रसंजीवनीमपि। यदेच्छतितदाता
सां कृत्वासंजीवनंचणात् इहाल्याद्विक्रीडांसंकृत्यपुनश्चै
वविसर्जयेत्। विवाहितोयदाराजा तत्पश्चाच्चित्रिता
स्त्रियः ४ दृष्ट्वापुत्रमुखंराजा नित्यन्तासांनजीवनम्।
करोतिजीविताश्चेताः पंचमेद्दिवसेतदा ५ स्वस्वमा
र्जनकर्त्रीभिश्चोक्तास्सर्वानिरादरम्। एकदाजीविता
स्सर्वादैवान्नैवविसर्जिताः ६ गरन्द्दुःकुमाराथशोकार्ते
आश्चर्य की बात है शिव २-१ वाचक बोले राजा चित्रकेतु
चित्रबनाने में बड़ा चतुर था सो अपने सोनेवाले महल में
दशलाख मकान में जुदा २ दशलाख स्त्रियोंकी तसबीर चित्र
की मूर्ति लिखी थी २ चित्रविद्या जानताथा राजा तथा चित्र
को सजीवन करने की विद्या भी जानताथा जब चित्रकेतु
इच्छा करैकि इनस्त्रियों को सजीवन करना चाहिये तब उसी
वखत स्त्रियों को सजीवन करिकै ३ तिनकेसंग हास्यविलास
करिकै फिरि तुरंत विसर्जन करि देतारहा जबराजाको विवाह
भया तब इनस्त्रियों की चित्रकी मूर्ति बनाताभया विवाहके
पेशतर नहीं बनाता था ४ जब राजा चित्रकेतुके पुत्र नहीं
भया तब तौ नित्यस्त्रियों को सजीवन करताथा पुत्रभये पीछे
पुत्रको मुखदेखिकै आनंद में मस्तहोगया तब नित्यस्त्रियों
को सजीवन नहीं किया जब कभी यादि आवै तब पांचवें
दिन कभी सातवें दिन सजीवन करने लगा ५ एकदिन चित्र-
केतु स्त्रियों को सजीवनकरिकै पेशतर सरीके सब कामकरता
भया दैवयोगसे बिसर्जन नहीं किया तबवो सब स्त्रियों से
उन स्त्रियों की झारनेवाली जो दासीथी सो सब कहती भई

नन्नृपेनच । विसर्ज्जितानसर्वास्तायोषिद्भावञ्चसंस्थिताः । ब्राह्मणैर्बालहत्यायाव्रतंचेरुर्निरूपितम् ७ इति भा० ष० शं० मं० चतुर्दशेऽध्याये चतुर्दशवेणी ॥ १४ ॥ श्लोक ॥ ११ ॥

श्रोतार ऊचुः॥मुनीकथंकोपप्रच्छ युवांराजाविचक्षणः । चित्रकेतुर्मुनीन्सर्वान्जानीतेभुवनत्रये १ वाचक उवाच ॥ यद्यप्याश्वासितोराजामुनिभ्यांचतथापिवै । पुत्रशोकार्तहृदयोनबुबोधमुनीश्वरौ २ इ० भा० ष० शं० मं० पंचदशे ऽध्याये पंचदशवेणी ॥ १५ ॥ श्लोक १० से ॥ १५ तक ॥

कि जबसे राजा के पुत्र हुआ तबसे तुम सबको अनादर करि दिया अनादर क्या नित्य तुमारा सजीवन करताथा सो अब पांचसात दिन में सजीवन करता है हमसब तुमसब को नित्यभ्मारती हैं सफा करती हैं ऐसे दासियोंके वचन सुनिके बालक को विषदेती भई बालक नष्ट होगया तब राजाशोकसे दुःखी होके उन स्त्रियों को विसर्जन नहीं किया इसवास्ते जीतीरहगई ब्राह्मणों ने बाल हत्या को शांति होनेवास्ते जो उपाय बनाये सो करती भई हे श्रोता हो इस प्रकारकी दशा-लाख स्त्री चित्रकेतुकीथीं आदमी रूप नहीं रहीं ७ इति०भा० ष० शं० मं० चतुर्दशेऽध्यायेचतुर्दश वेणी॥१४ श्लोक ११ ॥

श्रोता पूछते भये राजा चित्रकेतु बड़ा चतुरथा तथा तीन लोकमें जो मुनिजनथे तिनको जानताथा फिरि नारदको तथा अंगिराको क्यों पूछाकि तुम दोजने कौन हौ तुमारा क्या नामहै १ वाचक बोले राजा चित्रकेतु को नारद तथा अंगिरा ज्ञान देते भये तौभी पुत्र शोकसे राजा बहुत दुःखी

श्रोतार ऊचुः ॥ सर्वेषांचैवभूपानांसभार्याणांगतिश्श्रुता। विपरीता कथंजाताचित्रकेतोर्गतिश्शुभा १ विद्याधराधिपोभूत्सस्तद्भार्या कुत्रसंगता २ वाचक उवाच॥ छायान्यायोत्रमन्तव्यो यत्र भूपस्तुतत्रसा। ग्रंथबाहुल्यभीतश्चनलिलेखमहामुनिः३इ०भा०ष०शं० मं० षोडशेऽध्याये षोडशवेणी॥ १६ ॥श्लो०॥ २९ ॥

श्रोतार ऊचुः॥ अनेकजन्मलाज्ञानी सर्वदेवप्रपूजकः। देवर्षिशिष्योभूत्वापि शेषपादानुकूलवान् १ एतल्ल होरहा है पहिंचानानहीं कि ये तो नारद तथा अंगिरा मुनि हैं २ इतिश्री भा० ष० शं० मं० पंचदशे ऽध्याये पंचदशवेणी ॥ १५ ॥ श्लो० ॥ १० से १५ तक ॥

श्रोता पूछते भये सब राजा जिस लोकको गये हैं तब उन सब राजोंकी स्त्रीभी उनके संग उसी लोकको गईहैं ऐसा हम सब शास्त्र में सुना है परंतु चित्रकेतु तो विद्या धरोंका राजा हुआ तब उसकी स्त्री किसलोकको गई १ वाचक बोले जैसा सबके देह की छाया देहके संगको नहीं छोड़ती इसी प्रकार से पतिव्रता स्त्री अपने पतिको संग नहीं छोड़ती जहां पति जाता है उसी स्थानको वो जातीहै इसी विचारसे चित्रकेतु विद्याधरको राजा हुआ तो वह विद्याधरकी रानी हुई ग्रंथ बड़ा होजायगा इसवास्ते व्यासजी रानी की कथा नहीं वर्णन किये विचार कियेकि पंडितलोग जान लेवेंगे ५ इति भा० ष० शं० मं० षोड़शे ऽध्याये षोड़शवेणी ॥ १६ ॥ श्लोक॥ २९ ॥

श्रोता पूछते भये चित्रकेतुराजा अनेक जन्मको ज्ञानी था तथा सब देवतोंको पूजन करनेवाला था नारद का चेलाभीथ

क्षणसंयुक्तो मूर्खवद्विजहासच। जगतःपितरौदृष्ट्वा गि
रिजाशंकरौकथम् २ वाचक उवाच ॥ बलिनाकृतवान्क
र्म पूर्वंविद्याधरस्यसः । जहाराक्षीणपुण्यस्य राज्यंमंत्र
प्रभावतः ३ अतोभगवतोनुज्ञाम्प्राप्यमायाविमोहिनी
विद्याधरंमोहयित्वा कार्यमेतदकारयत् ४इति० भा० ष०
शं० मंजर्य्यांसप्तदशेऽध्यायेसप्तदशवेणी १७॥श्लो० ५॥

श्रोतार ऊचुः ॥ इन्द्रनाशायसागर्भन्दधौक्रोधेनका
मतः । कथंत्वयानविज्ञातस्सहस्राक्षोन्यरूपवान् १
वाचकउवाच ॥ ईश्वराज्ञांसमुल्लंघ्य कार्यंकर्तुंसमुद्यता

शेषकी कृपा चित्रकेतुकेऊपर बहुतथी १ इतना लक्षणोंकरिके
युक्त चित्रकेतु जगत्के माता पिता जो शिव तथा पार्वती को
देखिके क्यों हंसता भया २ वाचक बोले जैसा बलि राजा यज्ञ
करिके इन्द्र के राजको छोरिलिया आप इन्द्र होगया तब जिस
पुण्य करिकै इंद्र राज पाया था वो पुण्य नष्ट नहींभईथी थोरी
बाकी थी इस वास्ते भगवान् बामन रूप धरिकै इंद्रको राज
देते भये तैसा कर्म चित्रकेतु भी किया विद्याधरों के राजकी
पुण्य नष्ट नहीं भईथी परंतु चित्रकेतु मंत्र जपिकै विद्याधरों
का राजा हुवा ३ इसी वास्ते भगवान् अपनी मायाको आज्ञा
देकै मायासे चित्रकेतुको मोहित करिकै शिवको द्रोहकरायके
चित्रकेतुको नष्ट किया४ इ० भा० ष०शं० मं० सप्तदशेऽध्याये
सप्तदशवेणी ॥ १७ ॥ श्लोक ॥ ५ ॥

श्रोतापूछते भये दितिने इन्द्रको नाश करने वास्ते गर्भको
धारण किया तब इंद्रने दितिको गर्भ नाश करने वास्ते कपट
करिकै दिति को सेवन करने लगा पणादिति को क्यों नहीं
मालूम पराकि यह इन्द्र है क्योंकि दिति कुछ गँवारि नहीं

अतोसुमोहमोहेन नवुमोभशचीपतिं २ इति० भा० ष० शं० मं० अष्टादशेऽध्याये अष्टादशवेणी १८ श्लो० ५६॥

श्रोतार ऊचुः॥ विष्णोरावाहनाद्यर्च्चा मंत्रश्चोंकार संयुतः। उक्तंचसप्तमश्लोक आहुतिश्चाष्टमेतथा। सो च्चोंकारयुतोब्रह्मन्कथम्पाठ्याविमोस्त्रिया १ वाचक उवाच॥ तदुच्चारंस्वपतिना कारयित्वा पतिव्रता।

थी बड़ीचातुरथी यहशंकाहोतीहै १वाचकबोलेजब दितिनेइंद्रके नाशकरनेवास्ते उपायकिया तब भगवान् मनाकियाहै अंबाजी अभीइन्द्रकीपुण्य बहुतहैअभी इन्द्रकानाश नहींहोगा परिश्रम मतिकरो भगवान्कीआज्ञाको नहींमानी इन्द्रकेनाश होनेवास्ते गर्भधारण किया भगवान् के वचनको नहीं माने इसवास्ते इन्द्रको कपट नहीं जानती भई पागलि होगई॥२॥ इ०भा० ष० शं०मं०अष्टादशेऽध्यायेअष्टादशवेणी १८ ॥ श्लोक ॥ ५६॥

श्रोता पूछते भये हे गुरुजी षष्ठस्कंधके अध्याय १६ श्लोक ७ में विष्णुको आवाहन आदि पूजन को मंत्र ॐकार सहित दितिसे कश्यप कहेथे तथा श्लोक ८। ६ में होम करने की बिधि कहेथे परन्तु ॐकार को तथा वेदके मंत्रोंकोस्त्री कैसे पठन करैगी क्योंकि स्त्रियोंको वेदपढ़ना तथा ॐकारकापढ़ना सुनना दोऊ मनाहै दितिको कश्यप सुनाये तो ठीक है महात्माहैं पण दिति पठन कैसा किया होगा यह शंका है१वाचक बोले दिति पतिव्रताथी अपने पतिजो कश्यप तिनसे ॐकार को तथा वेदमंत्र को पढ़ायकै आपु दूसराजो अक्षरहै स्तोत्र में जैसा नमोभगवते इस आदिलै तिनको पढ़ती भई इसवास्ते दोषनहीं भया ॐकार तथा वेदमंत्र आपु पढ़ती तबतो दोष

पठेदन्न्यात्तरंसाध्वी नदोषोऽनेनसंभवेत्२ इतिश्रीभा० ष० शं० मं० एकोनविंशेऽध्यायेएकोनविंशवेणी १६॥ श्लो० ७ से ६ तक ॥

होता पतिसे पढ़ायके कामकरि लिया ॥ २ ॥ इति० भा० ष० शं०मं० एकोनविंशेऽध्यायेएकोनविंशवेणी ॥ १६ ॥ श्लोक ॥ ७ से ६ तक ॥

इतिश्रीभागवतषष्ठस्कंध शंकानिवारणमंजरीशिवसहायबुधविरचितासुधामयीटीकासहितासमाप्ता श्रीशंकरार्पणमस्तु ॥

श्रीगणेशायनमः ॥

श्रीमद्भागवतशंकानिवारणमंजरी ॥

सप्तमस्कंधे ॥ ७ ॥

सुधामयीटीकासहिताविरच्यते॥

श्रोतार ऊचुः॥ शुकेनोक्तंनमस्कृत्यकथयिष्येहरेःकथाम्।कृष्णम्मुनिम्प्रोक्त पूर्वानतुगाथाहरेश्वसा १ वाचक उवाच ॥ अस्यपूर्वेमयोक्तायान ताहरिकथाःस्मृताः । नविचार्य्यैवमूचेसः कथयिष्येहरेःकथाम् २ प्रह्लादरक्षणार्थय विष्णुराविर्भविष्यति । सिंहरूपेणभगवानतः

श्रोता पूछतेभये कि हेगुरुजी राजासे शुकदेवजीने कहा कि व्यासको नमस्कार करिकै हरिकी कथा अबमैं कहौंगा बड़ी शंकाहै ऐसे वाक्यसे मालूम परताहै कि सप्तमस्कंध के पहिले जोस्कंध ६ वर्णनभये हैं उन्होंमें हरिजो भगवान् तिन की कथा नहीं है १ वाचक बोले शुकदेवजी ऐसा विचारि कै नहीं कहेथे परीक्षितुसे कि स्कंध ६ में भगवान्की कथा नहीं है अब भगवान्की कथा मैं कहताहूं २ शुकजीने जानिलिया कि प्रह्लादकी रक्षाकरनेवास्ते भगवान् सिंहकोरूप धारिकै प्रगटहोवैंगे शास्त्रमें सिंहको हरिनामहै इसवास्ते शुक कहेथे कि हे राजन् अब हरिकहे सिंहरूप भगवान्की कथा मैं

प्रोक्तमिदंवचः ३ इतिश्रीभा० सप्त० शं० मं० शिव सहायबुधविरचितायांप्रथमेऽध्यायेप्रथमवेणी ॥ १ ॥ श्लो० ॥ ५ ॥

श्रोतार ऊचुः ॥ त्रिलोकेमुनयश्चक्रुर्दुःखितेसुखितेऽपिवा। उपदेशंकदापीत्थंयमेनापिकृतंश्रुतम् ।नश्चक्रेसः कथंपत्न्या स्सुयज्ञस्योपदेशकं १ वाचक उवाच ॥ बाल्याद्यमस्यसाभक्तिं चकारनृपवल्लभा । अतोयमस्स मागत्य हत्वाशोकंददौगतिम्॥२॥ इ०भा० स० शं० मं० द्वितीयेऽध्यायेद्वितीयवेणी ॥ २ ॥ श्लोक ॥ ३६ ॥

श्रोतार ऊचुः ॥ स्वेच्छयाप्रददौब्रह्मा सर्वेषाक्वर

कहताहूं ऐसा कहेहैं ३ इति भा० स० शं० मं० सुधामयीटीका यांप्रथमेऽध्यायेप्रथमवेणी ॥ १ ॥ श्लोक ॥ ५ ॥

श्रोतापूछते भये कि प्राणी दुःखीहोवै चाहे सुखीहोवै परंतु तीनलोकमें प्राणीको सुखहोनेवास्ते मुनिजन उपदेश करतेथे ऐसा शास्त्रमेंसुनाहै परंतु यमराज किसीको नहीं उपदेशकिहे ऐसाभी सुनाहै सो यमराज सुयज्ञ राजाकी स्त्रियोंको उपदेश क्योंकिये हे गुरुजी यहबड़ी शंकाहै १ वाचक बोलते भये सुयज्ञ राजाकी स्त्री बालपनसे यमराजकी सेवन करती थी इसी वास्ते रानीको दुःखी देखिकै यमराज रानी के सामने आयकै ज्ञानदेकै शोकको हरिकै सुंदर गतिकहे पतिके लोक को रानीको भेज देते भये रानी ज्ञान पाइकै अपने पतिके पासगई इसवास्ते यमराज उपदेश करते भये २ इति० भा० स०शं०मं०द्वितीयेऽध्याये द्वितीयवेणी ॥२ ॥ श्लोक ॥ ३६ ॥

श्रोता पूछते हैं हेमुनिजी जो जो प्राणी ब्रह्माकी तपस्या किया उन सबको अपनी इच्छासे ब्रह्मा बर देतेभये ब्रह्माको

मुत्तमम् । अनाहृतस्सुरैरस्य ज्ञापितोदेवतागणैः ।
प्रादाद्धिरण्यकशिपोर्वरम्ब्रह्माकथंमुने १ वाचक उवाच॥
विज्ञायमानसंतस्य भावृन्दातुंवरंहिसः । नहृयेपसुराणा
न्दैदुःखंज्ञात्वाददौवरम् ॥ २ ॥ इ० भा० स० शं० मं०
तृतीयेऽध्यायेतृतीयवेणी ॥ ३ ॥ श्लोक ॥ १४ ॥

श्रोतार ऊचुः ॥ हिरण्यकशिपुर्लेभे वरंयद्दिनद्दा
शुवै । धर्मेविष्णौसुरेसाधौ गविवेदेषुब्रह्मसु १ द्वेषंच
क्रेयदैतेषु हिरिणोक्तमिदंकथम्। द्वेषकारीसभविता तत्क्ष
णेनाशमाप्नुयात् २ वाचक उवाच ॥ पृथक्द्वेषम्प्रचक्रे

देवतोंने प्रार्थना नहीं किया कि तुम बरदेवो और इस
हिरण्यकशिपु को देवतोंके कहे बर क्यों दिया यह बड़ा
आश्चर्य है १ वाचक बोले हिरण्यकशिपु ऐसा विचारिके तप-
स्या करने लगा कि बरदान लेके भगवान् को बधन करोंगा
हिरण्यकशिपुके मनकी बात जानिके ब्रह्माके हिरण्यकशिपु
के वास्ते बरदान देनेकी इच्छा नहींथी परंतु जब देवतोंने
ब्रह्मासे कहेकि हमसब दुष्टके तपके तेज करिके जलतेहैं ऐसा
देवतोंको दुःख देखिके तब ब्रह्मा बर देतेभयेइसवास्तेदेवतों
की प्रार्थनासे ब्रह्मा दिहेहैं २ इति भा० स० शं० मं० तृतीयेऽ
ध्याये तृतीय वेणी ॥ ३ ॥ श्लो० ॥ १४ ॥

श्रोता पूछतेभये हिरण्यकशिपु जिस दिन ब्रह्मा से
बरदान पाया उसीदिन से धर्म से भगवान् से देवतावों से
साधुवोंसे गायसे ब्राह्मणोंसे वेदोंसे इन सबसे १ बैर करता
भया तब भगवान् देवतोंसे क्यों कहेकि हे देवता लोगो डरो
मति जब हमसे धर्मसे देवतोंसे गौसे वेदसब्राह्मणसे साधुसे
बैर करैगा तब उसी वखत हम हिरण्यकशिपुको मार

स एकसर्वैष्वेतेषुराक्षसः। युगपद्भगवत्प्रोक्तो द्रोहकर्ताविनश्यति ॥ ३ ॥ इतिश्री भा० स० शं०नि० मं० चतुर्थेऽध्यायेचतुर्थवेणी ॥ ४ ॥ श्लोक ॥ २७ ॥

श्रोतार ऊचुः ॥ शक्रादयश्चकम्पन्ति यस्यत्रासान्निरंतरम्। जीवन्तिराक्षसास्सर्वे यत्कृपादृष्टिवीक्षिताः १ तस्यपुत्रः कथम्प्रोक्तोमुनिनाराजसेवकः। चेद्राजासेवकस्तस्यसर्दीनश्चकथम्मुने २ वाचक उवाच ॥ येषाम्पुरोहितायेवैतेषान्तेसेवकाः स्मृताः। धर्मशास्त्रमतन्त्वेत

डालैंगे यह बड़ी शंकाहै २ वाचक बोले इन सबसेतो जुदा जुदा बैर राक्षस करता था राजनीति विचारिकै फेरि फेर लगायके परंतु वेदसे भगवान्‌से बहुतबैर करता भयालेकिन ब्राह्मणों से प्रीतिभी करना तथा बैरभी करना ऐसी चतुराई से बैर कियाथा और भगवान् कहेकि जो सबसे एक दफा बैर करैगा तबतो उसी वखत मारि डालोंगा ३ इतिश्री भा० शं० नि० मंजर्यां चतुर्थेऽध्याये चतुर्थवेणी॥ ४ ॥ श्लो० २७॥

श्रोता पूछते भये जिस शुक्राचार्य के डरसे. इंद्र आदि देवता रातिदिन कांपतेहैं जो शुक्राचार्य कृपाकरिके राक्षसोंको देखतेहैं तब राक्षस आनंदकरतेहैं जब राक्षसोंके ऊपर शुक्राचार्य कृपा न करैं तब उसी वखत राक्षस बहुत दुखीहोजातेहैं१ हेगुरुजी ऐसे प्रतापी शुक्राचार्य तिसके पुत्रको नारद राजा को सेवक क्योंकहे और जो कोई विद्वान् ऐसा अर्थकरै कि शुक्रके पुत्रको सेवक राजा है इसवास्ते राजसेवक कहेहैं तो फिरि दुःखी शुक्रको पुत्र क्योंहुआ यह बड़ी शंकाहै २ बाचक बोले धर्मशास्त्रको यहमतहै कि जिसमनुष्यको जो पुरोहित होताहै सो उसका सेवक कहाताहै पुरोहितमें तथा सेवकमें

इतोनारदभाषितम् ३ इतिश्री भा० स० शं० मं० पंच मेऽध्याये पंचमवेणी ॥ ५ ॥ श्लोक ॥ १२ ॥

श्रोतार ऊचुः ॥ मानुष्यंजन्मप्रह्लादोवर्णयामा सबालकान् । भगवद्भजनंत्यक्त्वादैत्यानान्तेनमानवाः १ वाचक उवाच ॥ सर्वेभ्यःप्राणिभिर्ज्ञातंमानुष्यं जन्मउत्तमम् । तत्रापिहरिभक्तानामतस्तेषांप्रलोभनम्। कर्तुंप्रशंसयामासमानुष्यंजन्मसोसुरः २ इ० भा० स० शं० मं० षष्ठे ऽध्याये षष्ठवेणी ॥ ६ ॥ श्लो० ॥ १ ॥

श्रोतार ऊचुः ॥ स्वाश्रमेजननान्नीत्वानारदोमेतदन्तिके । सावसदैत्यपुत्रान्वैप्रह्लादोक्तमिदंवचः १ नचा

कुछभी भेद नहीं है इसवास्ते शुक्रके पुत्रको नारद राजसेवक कहेहैं ३ इति भा० स० शं० मं० पंचमेऽध्याये पंचम वेणी ५ श्लोक १२ ॥

श्रोता पूछतेभये कि दैत्योंके बालकोंसे प्रह्लादने भगवान्को भजन त्यागिके मनुष्यके जन्मकी तारीफ किया तब तो दैत्योंके बालक मनुष्य नहींथे वोतो राक्षसोंके पुत्रथे यह बड़ी शंकाहै १ वाचक बोले सबप्राणी जानते हैं कि मनुष्य जन्म सबसे बड़ाहै तिसमनुष्योंमें भी भगवान्के भक्त बड़ेहैं इसवास्ते दैत्यके पुत्रोंको लोभ देखानेवास्ते मनुष्य जन्मकी तारीफ प्रह्लाद करतेभये प्रह्लाद विचार किहे कि ये लोग भी मनुष्यको कर्म सुनिके मनुष्यसरीके भगवान्में प्रीतिकरैंगे २ इति भा० स० शं० मं० षष्ठेऽध्याये षष्ठवेणी ६ श्लोक १ ॥

श्रोता पूछतेभये राक्षसोंके बालकोंसे प्रह्लाद कहे कि नारदमुनि मेरी मैयाको अपने आश्रमपर लेगये तब मेरी मा

ग्रमोनारदस्यनतस्यास्थिरताश्रुता। तयाकृतः कथस्त्वा सरशंकेयम्महतीहिनः २ वाचक उवाच॥ भगवद्भज नार्थस्वैबद्रिकायांशुभाश्रमम्। नारदस्यास्तितत्रैवभ्रा न्त्वासोभुवनत्रये। करोतिभजनंविष्णोस्तत्रस्थानान्नवैभ यम् ३ इतिश्री भा० स०शं० नि० मंजर्यां सप्तमे ऽध्या ये सप्तमवेणी॥ ७ श्लोक॥ १२॥

श्रोतार ऊचुः॥ जग्रहुर्दैत्यपुत्रास्तेप्रह्लादस्यानु शासनम्। लोकेवेदेपितेषान्नैननामाऽपिश्रुतंचनः १ न्यूनानामपिश्रेष्ठानामन्येषान्तपस्विनाम्। ब्रह्मज्ञानां नारदके आश्रममें टिकतीभई जबतक मेरापिता वरदानलेके आयानहीं तबतक १ हेगुरुजी हमलोगोंने ऐसा सुनाहै शा- स्त्रोंमें कि नारदमुनिके आश्रम नहीं है तथा नारदमुनि किसी स्थानपर घड़ीदोचार टिकतेभी नहीं तब नारदके आश्रमपर प्रह्लादकी मा कैसे बहुत दिनतक टिकती भई यह बड़ी शंकाहै २ वाचकबोले भगवान्को भजन करनेवास्ते बद्रिका श्रममें नारदको गुप्त आश्रम है तीनलोकमें नारद भ्रमण करिके अपने आश्रमपर आयके ईश्वरकोभजन करतेहैं नारद के आश्रमपर जोजीव बसतेहैं उनको किसीको भयनहींहोती इसवास्ते प्रह्लाद दैत्यके बालकोंसे कहेहैं ३ इति भा० स० शं० नि० मंजर्यां सप्तमेऽध्याये सप्तमवेणी ७ श्लोक १२॥

श्रोता पूछतेभये राक्षसोंके लड़िकोंने प्रह्लादसे ज्ञान सिखतेभये परंतु ज्ञानियोंका नाम लोकमें तथा शास्त्रमें सब जीवोंको मालूम परता है परंतु उनको तो नाम शास्त्र तथा लोक में हम तो नहीं सुने किधरगए वो लड़ के १ हे गुरुजी छोटा तपस्वीको बड़ा तपस्वीको और जो तपस्वी

श्रुतन्नश्च कुत्रतेसंगताःप्रभो २ वाचक उवाच ॥ आग
त्यभार्गवोदृष्ट्वादैत्यपुत्रान्विरागिनःपुनस्ताञ्छिक्षया
मास तद्धर्माञ्छ्रापत्रासतः ३ बालत्वात्तत्यजुस्सर्वे
प्रह्लादशिक्षणन्तथा । राक्षसंकर्म्मतेचक्रुस्तोनैवतपस्वि
नः ४ इतिश्री भा० स० शं० मं० अष्टमेऽध्यायेअष्टम
वेणी ८ श्लो० ॥ १ ॥

श्रोतार ऊचुः ॥ प्रह्लादेप्रीतिरधिका हरेरद्भुतक
र्मणः ।तत्कथंनददौशीघ्रम्वरंचतत्यजेरुषम् ।विलंबकृतं
वान्भूरि भ्रमोयम्वर्त्तते च नः १ ॥ वाचक उवाच ॥
तथा ब्रह्मज्ञानीहैं उन सबको नाम हमलोग सुनाहै परंतु
प्रह्लाद के शिष्योंको नाम हम नहीं सुना प्रह्लाद से ज्ञानलेकै
वो लोग किस लोकको गये यह भ्रमहै २ वाचक बोले यह उत्पा
त प्रह्लाद की तथा हिरण्यकशिपुकी यज्ञ होना प्रारंभ भया
तब शुक्राचार्य उसके पास नहींथे पीछेसे आयकै सबउत्पात तथा
राक्षसों के लड़कों को सुंदर कर्म करता देखिकै लड़कों से शुक्र
बोलेकि यहकर्मतुम सबजनेत्यागिदेवो नहींत्यागोगे तोहमतुम
सबको भस्म कर देवैंगे ऐसा डरपाय कै लड़कोंको फिर राक्षस
कर्म सिखाते भये ३ बालक लोग तपस्या में कच्चेथे इसवास्ते
डरकै सुंदर कर्म त्याग दिहे और राक्षस कर्म करने लगे इस
वास्ते तपस्वी नहीं भये बिना तपस्वीभये नाम कैसा मालूम
परैगा ४ इतिभा० स० शं० नि० मं० अष्टमे ऽध्याये अष्टम
वेणी ॥ ८॥ श्लोक ॥ १॥

श्रोता पूछते भये नृसिंह रूप भगवान् की बड़ी प्रीति प्र-
ह्लाद के ऊपरथी फिरि जल्दी क्रोधको त्यागिकै प्रह्लादको
बरदान क्यों नहीं दिहे ऐसी प्रीति करिकै फिरि बर देनेमें

शीघ्रं नतत्यजे क्रोधं नचतूर्णं स्म वरन्ददौ। लोकान्ख्यापयितुं चक्रे विलम्बञ्जगदीश्वरः २ इति० भा० स०शं० मं० नवमेऽध्यायेनवमवेणी ९ श्लो० ॥ २ ॥

श्रोतार ऊचुः ॥ सार्द्धंकनककेशेन चत्वारःपितरो गताः। प्रह्लादस्यैकविंशैश्च पितृभिःकथमुक्तवान्। हरिस्तन्तेपिताप्तः शंकास्तिदारुणाचनः १ वाचक उवाच ॥ व्यतीतांश्चतुरोज्ञात्वा भविष्यन्दशसप्तच। एकविंश

विलंब क्योंकिये यह बड़ी शंकाहै १ वाचक बोले श्रीनृसिंहजी जल्दी क्रोध नहीं त्याग किये तथा प्रह्लादको जल्दी बरदान भी नहीं दिहे तिसका कारण यहहैकि लोकमें प्रह्लादकी भक्तिकी बड़ाई कराने वास्ते क्रोध त्यागनेमें तथा बरदान देनेमें देर किये लोकमें सब ऐसा वचन कहैंगेकि सब देवता नृसिंहजीकी स्तुति किये परन्तु क्रोध नहीं शांतभया जब प्रह्लाद स्तुतिकरते भये तब उसी वखत क्रोधको त्यागि देते भये ऐसा भगवान् को प्रह्लाद प्याराहै इसवास्ते क्रोध देर को त्यागते भये तथा वरदान भी देनेमें देर कियेहैं २ इति भा० स० शं० मं० नवमेऽध्याये नवमवेणी ॥९॥ श्लो०॥२॥

श्रोतापूछते भये प्रह्लादसे नृसिंहजी कहेकि तुमारा बाप एक बीस पीढ़ी को संग लेके बैकुंठको गया है गुरुजी इस बातमें हमारे सबको बड़ी शंका होती है क्योंकिहिरण्यकशिपु सहित गनै तब चारि पीढ़ी होतीहैं क्योंकि ब्रह्मा १ मरीचि २ कश्यप ३ हिरण्यकशिपु ४ ये चारि भयेतो एकबिंशपीढ़ी भगवान् क्यों कहेथे १ वाचक बोले चारि पीढ़ी बीती जानिके तथा सतरह १७ पीढ़ी अगाड़ी की लेकेइस प्रकारसे पीढ़ी१७

मिताश्चैते हरिणोक्तास्तदाभुवम् २ इति० भा० स० शं०मं० दशमेऽध्यायेदशमवेणी १० ॥ श्लो०॥ १८॥

श्रोतार ऊचुः॥ युगत्रयेद्विजास्सर्वे गुणज्ञाःकमला पतेः।येन्यूनाज्ञानवार्तायान्तेऽपिनारायणेरताः १जानंति त्वद्विधाविप्राश्चारित्रं कमलापतेः । नारदंप्रत्युवाचै वन्धर्मराजःकथं गुरो२वाचक उवाच॥ ब्राह्मणान्तपसो न्मत्तान्केचिद्भूपांश्चराज्यतः।धर्मराजोविचार्य्यैवम्प्रो वाचनारदंप्रति ॥ ३ ॥ इ० भा० स० शं० मं० एकादशे ऽध्यायेएकादशवेणी ॥ ११ ॥ श्लोक ॥ ४ ॥

श्रोतार ऊचुः॥नकस्यापिश्रुतंलोके लौकिकेनावलो

भगवान् कहेहैं २ इतिश्री भा० सप्तमस्कंधे शं० नि० मंजर्य्यां सुधामयी टीकायां दशमे ऽध्याये दशमवेणी ॥ १०॥ श्लोक ॥ १८ ॥

श्रोता पूंछतेहैं कि हेगुरुजी सतयुग त्रेता द्वापरमें सब ब्राह्मण भगवान्के गुणको जानतेथे जो कोई ब्राह्मण ज्ञान की बात में थोरा समझताथा सोभी भगवान् के चरणोंमें प्रीति करता था १ हे गुरुजी तब फिरि नारदसे युधिष्ठिर क्यों कहेथे कि भगवान्के चरित्रको आपुसरीके ब्राह्मण जानते हैं दूसरा नहीं जानैगा यह बड़ी शंकाहैकि नारद ज्ञानी भये और सब ब्राह्मण अज्ञानी भये २ युधिष्ठिरने किसी किसी ब्राह्मणों को तपस्या करिकै उन्मत्त जानिकै तथा किसी किसी राजोंको भी राजसे उन्मत्त जानिकै नारदसे ऐसा वचनकहे ३ इति भा० स०शं० मं० एकादशे ऽध्याये एकादश वेणी॥ ११॥श्लो०॥४॥

श्रोता पूछते भये ॥ हे गुरुजी यहबात शास्त्रमें हमलोग नहीं सुना तथा लोकमें देखा भी नहीं कि गुरुकी स्त्री शिष्य के

कितम्। गुरुस्त्रीभिश्चशिष्यस्य कृतमभ्यंजनादिकं।कार येन्नगुरुस्त्रीभिरात्मनो ऽभ्यंजनादिकम्।कथंमुनिरुवाचेदं युवार्वधर्मनंदनम् २ वाचक उवाच ॥ ज्ञात्वाकलियुगं घोरमागतंसन्निधौमुनिः तज्जानांशिक्षणार्थाय वाक्य मेतदुवाचह ॥ ३ ॥ इति० भा० स०शं०नि०मं०द्वादशेऽ ध्यायेद्वादशवेणी ॥ १२ ॥ श्लोक ॥ ८ ॥

श्रोतार ऊचुः॥ मुनिनाजगरेणोक्तं सर्वस्मुंजिमपरे च्छया । ददातिकोपिचेदुष्टः प्रमदाद्यन्न्यकुत्सितं १

देहमें मालिश करिके स्नान करायके तेल फुलेल शिष्यके देह में लगावै तथा शिष्यके बार स्मार देवै शृंगार करिदेवै आंखों में अंजन लगाय देवै १ फिरि नारद मुनि धर्मराजसे क्योंकहे कि जवान शिष्य होजावे तो अपनी देहको अंजन आदि कर्म गुरुकी स्त्रीसे न करवाना तथा करवावैगा तौ भ्रष्ट होजावैगा यह बड़ी शंकाहै २ वाचक बोले हे श्रोताहो जब नारदको युधिष्ठिरको संवाद भया उसी दिनके थोरेही दिन पीछे कलि-युगको भूमिमें राज नारद मुनि जानिके ऐसा वचन युधिष्ठिर से कहि रहेथे कलियुगमें जन्मैंगे मानुष्य तिनको सिखाने वास्ते क्योंकि कलियुगमें ज्ञान रहना कठिनहै ३ इ० भा० स० शं० मं० द्वादशेऽध्याये द्वादशवेणी ॥ १२ ॥ श्लोक॥ ८॥

श्रोता पूछते भये अजगर मुनि प्रह्लादसे कहेकि हमारे वास्ते कोई चीज भली बुरी कोईभी प्राणी देताहै तब उस चीजको हम ग्रहण करतेहैं परन्तु इच्छा किसी चीजकी हम नहीं करते हे गुरुजी संसारमें अनेक प्रकार के जीवहैं जो कोई दुष्ट जीव मसकरी करने वास्ते स्त्री आदि लैके और जो खराबचीज है जैसा मदिरा आदि लैआयके अजगर मुनिको

भाविष्यतिमहादुःखम्मुनिनोक्तंकथंत्विदम्। तदाकिं क्रियतेतेनतद्गृहाण्गृहयोपिच२वाचक उवाच॥सत्यम्मुनि वरेणोक्तंसर्वभोक्ताहिसस्मृतः। यश्चैवंकर्तुमिच्छेच्चतं विधक्ष्यतितत्क्षणे। हरेस्सुदर्शनन्तस्य रक्षणेयोजित स्सदा॥३॥ इति० भा० स० शं० मं० त्रयोदशेऽध्या येत्रयोदशवेणी॥१३॥ श्लोक॥३९॥

श्रोतार ऊचुः॥ लोकेवेदेश्रुतन्दृष्टन्नचैवंनश्चकर्हिचित्। योस्त्र्यर्थेविजहौप्राणान् जघानापितरंगुरुम् १ मैथिल्यर्थेरावणश्च द्रौपद्यर्थेचकौरवाः। एवन्नैवच

देवैगा तौ ग्रहण करते कि त्याग करते २ तौ अजगर मुनि कैसा करैंगे वडा दुःख होवैगा ग्रहण करैंगे तव नरकमें पड़ैंगे त्याग करैंगे तो भेददृष्टि कहावैंगे २ वाचकबोले अजगर मुनि सत्यकहेहैं सब चीजके भोग करनेवाले अजगर मुनि हैं परन्तु जो कोई ऐसा दुष्ट कर्म करनेको विचारभी करैगा तब उसको उसी वखत भगवान् को सुदर्शन चक्र भस्म करि देवैगा क्योंकि अजगर मुनिकी रक्षा करने वास्ते सुदर्शन चक्रको भगवान् सदाहुक्म करिदिहेहैं कि इनकोकोई उपद्रव देवै उसको तुरत भस्म करना ३ इ० भा० स० शं० मं० त्रयोदशे ऽध्याये त्रयोदशवेणी॥१३॥ श्लोक॥३९॥

श्रोता पूछते भये वेदमें ऐसा हमलोग नहीं सुना तथा लोकमें देखाभी नहीं कि स्त्री वास्ते कोई अपना प्राण त्यागि दिया होवै तथा पिता को गुरु को मारि डाला होवै १ जो कोई ऐसा कहै कि जानकी के वास्ते रामचंद्र रावण ब्राह्मणथा उस को मारिडाले तथा द्रौपदी के वास्ते पांडवों ने द्रोणाचार्य आदि गुरुको मारिडाले तौ ऐसा नहीं मानना

मन्तव्यो जीवानाम्मुनिनोदितम् २ वाचक उवाच ॥ तृष्णास्त्री नारदेनोक्ता नस्त्रियंलौकिकीतदा। त्यजन्त्यसून्गुरुंहंति सर्वेतृष्णासमन्विताः ३ इ० भा० स० शं० मं० चतुर्दशेऽध्यायेचतुर्दशवेणी १४ ॥ श्लो० ॥ १२ ॥

श्रोतार ऊचुः ॥ भोक्तव्यौद्वौद्विजौदैवे त्रयःपैत्र्येच नाधिकं। नारदोक्तिरियम्ब्रह्मन् कस्मिन्भोज्याश्चभूरिशः १ वाचक उवाच॥ नह्यत्रद्वौद्वयोरर्थो द्वौप्रकारौप्रगृह्यते। जितेंद्रियाश्चक्षुधिता भोजनीयास्त्वनेकशः२तथात्रीन् त्रिप्रकारांश्च पुत्रस्त्रीशिष्यसंयुतान् । पैत्र्येप्रभोज

चाहिये क्योंकि रामकृष्ण तो पूर्णब्रह्म थे पामर जीवोंके वास्ते नारदकहे हैं २ वाचकबोले तृष्णारूप स्त्री वास्ते नारद कहे हैं संसार की स्त्रीके वास्ते नहीं कहे तृष्णा स्त्रीके वास्ते प्राणियोंने जीवको त्यागि दिया है तथा पिताको गुरुको मारिडालते हैं ॥ ३ ॥ इ० भा० स० शं० मं०चतुर्दशेऽध्यायेचतुर्दश वेणी ॥ १४ ॥ श्लोक ॥ १२ ॥

श्रोतापूछते भये हे गुरु जी नारद मुनि युधिष्ठिर से कहे कि ब्राह्मण दो २ देवकार्य में भोजन कराना चाहिये तथा पितृकर्म में तीनब्राह्मण भोजन कराना चाहिये तो देवकर्म पितृकर्म से और दूसराकर्म कौन है जिसमें बहुतसे ब्राह्मण भोजन कराना चाहिये १ वाचकबोले(द्वौ)इसका दोब्राह्मण अर्थ नहीं है(द्वौ)को यह अर्थ है कि दोप्रकार को ब्राह्मण भोजन कराना देवकर्म में एक तो जितेंद्रिय दूसरा भूखा इस प्रकार ब्राह्मण देवकर्म में बहुत भोजन कराना चाहिये २ तिसी प्रकार से चतुर प्राणी पितृकर्म में पुत्र स्त्री शिष्य संयुक्त ऐसा तीनप्रकार को ब्राह्मण भोजन कराना चाहिये पुत्र १

येद्विप्रान् सख्यातान्सुकौशलः ३ इति० भा० स० शं० मं० पंचदशेऽध्यायेपंचदशवेणी १५ ॥ श्लो० ॥ ३ ॥

स्त्री २ शिष्य ३ ये तीनप्रकार ऐसा अर्थ उसश्लोकको है दो ब्राह्मण तथा तीन ब्राह्मण नहीं है जो दो ब्राह्मण तीन ब्राह्मण अर्थ होतातो पहिले युगोंमें राजा लोग असंख्य ब्राह्मण क्यों भोजन कराते ॥ ३ ॥ इति भा० स० शं० मं पंचदशेऽध्याये पंचदशवेणी ॥ १५ ॥ श्लोक ॥ ३ ॥

इतिश्री मद्भागवतसप्तमस्कंधशंकानिवारण
मंजरीशिवसहायबुधविरचितासुधामयी
टीकासंहितासमाप्ता ॥

श्रीशङ्करार्पणमस्तु ॥

श्रीगणेशायनमः ॥

श्रीमद्भागवतशंकानिवारणमंजरी ॥

अष्टमस्कंधे ॥ ८ ॥

सुधामयीटीकासहिताविरच्यते ॥

श्रोतार ऊचुः ॥ त्रिविष्टपश्चकस्स्वामिन् यमशास द्रुमापतिः । यज्ञोहत्वासुरगणान् भक्षितुं चागतान्म नुम् १ वाचक उवाच ॥ त्रीन्त्रिभ्यश्चैवयोपाति लो कान्त्रिभ्यएव च । त्रिविष्टपस्यविज्ञेयस्संतोषश्च शची पतिः २ कस्याऽपिमन्यतेशिक्षामिन्द्रोनैवजगत्पतिः ।

श्रोता पूछते भये हे स्वामिन् स्वायंभुव मनुको खानेवास्ते आये जो राक्षस तिनको मारि कै त्रिविष्टप को भगवान् सिखाते भये सो त्रिविष्टप क्या चीज है १ वाचक बोले चोर जारी जुवारी इनतीन दुष्टसे तीनों लोककी रक्षा जो करै तिस को नाम त्रिविष्टप है त्रिविष्टप इंद्रको शास्त्र में कहा है तथा दूसरा अर्थ यह है कि काम क्रोध लोभ इन तीन दुश्मनों से जो तीन लोककी रक्षाकरै तिस को त्रिविष्टप नाम है संतोष को भी त्रिविष्टप शास्त्र में कहा है क्योंकि काम क्रोध लोभ इनको नाश संतोषसिवाय दूसरा कोईभी नहीं करसकेगा२ हे श्रोता हो इन्द्रतो अभिमान में डूबि गया है किसी को भी सिखावन नहीं मानता इसवास्ते यज्ञ भगवान् संतोष को सिखाते भये कि भाई तुम काम क्रोधलोभ इनदुष्टों से तीन

अतोऽन्वशासत्संतोषंत्वञ्जीवान्रक्षसर्वदा ३ इतिश्री भा० अ० शं० मं० प्रथमेऽध्याये प्रथमवेणी ॥ १ ॥ श्लोक ॥ १८ ॥

श्रोतार ऊचुः ॥ महादाश्चर्यमेतद्धिहरयश्चापिद्राविताः । गजेंद्रगंधमाघ्राययेतेषाम्मदनाशकाः १ वाचक उवाच ॥ भवद्भिश्चैवसत्योक्तं हरयोघ्नंतिवैगजान् । गजःप्राकृतिकोनाग्न्तपोरक्षात्यिमंसदा । अतोदृष्ट्वाद्रवन्त्येनंहरयोगंधताडिताः ॥ २ ॥ इति० भा० अ० शं० मं० द्वितीयेऽध्यायेद्वितीयवेणी ॥ २ ॥ श्लोक ॥ २१ ॥

लोक की रक्षाकरो हे श्रोताहो त्रिविष्टप संतोषहै३इति० भा० अ० शं० मं० प्रथमेऽध्याये प्रथमवेणी ॥ १ ॥ श्लोक ॥ १८ ॥

श्रोता पूछते भये हाथियों के अभिमान को नाश करने वाले जो सिंहसो सब सिंहोंने उस गजकी देहकी सुगंधिको सूंघिकै वनछोड़िके भागिजाते भये बड़े आश्चर्यकी बातहै एक सिंहको देखिके हाथियोंको यूथप भागताहै सो उसके गंधिको सूंघिके सब सिंह भागते भये गुरुजी कालको जीवखाने लगा १ । वाचक बोले हे श्रोता हो आप सब जने सत्य कहते हो हाथियों को सिंह मारते हैं सिंहके सामने हाथी कभी भी नहीं खड़ा हो सकेगा सिंह के बनमें हाथी जाता भी नहीं यह बात जो खुद प्राकृत हाथी होता है तिस की है यह हाथी तौ तपस्वी था शापसे हाथी भया था परन्तु इसको राति दिन इसका पेश्तर का तप रक्षा करताथा उस तप की सुगन्ध से भस्म होते जो सिंह सो सब भागि गये २ इति भा० अ० शं० मं० द्वितीयेऽध्याये द्वितीय वेणी ॥ २ ॥ श्लोक ॥ २१ ॥

श्रोतार ऊचुः॥ न्यूनंकार्येपिदुद्राव भगवान्कमलापतिः। तुच्छोभूमिनरेशोऽपि नैवन्द्रवतिकर्हिचित् १ वाचक उवाच॥ज्ञानवैराग्ययज्ञादि तपोदानजपादिभिः। अन्यैस्सुकर्मभिस्तूर्णमाविर्भवतिनद्रुतम् २ स्वनामोच्चारणंश्रुत्वागोवत्सामिवधावति। अतोदुद्राववेगेननामोच्चारणमात्रतः ३ इति भा० अ० शं० मं० तृतीये० तृतीयवेणी ॥ ३ ॥ श्लोक ॥ ३० ॥

श्रोतार ऊचुः॥ अनेकेहरिणास्पृष्टाऽनेकजन्मतपस्विना। विष्णुरूपन्नप्राप्तन्तैर्गजेंद्रःप्राप्तवान्कथम् १

श्रोता पूछते भये कि हे गुरुजी थोरा भी काम करने वास्ते भगवान् आपु से भागि के गजेंद्र को छुड़ाते भये यह बड़े आश्चर्य की बात है किसी देवता को भेजिकै काम कराय देते ऐसा ग्राह क्या दूसरा रावणादिक राक्षस भया था ऐसा तो थोरे काम के वास्ते कोई पृथ्वी में गरीब राजा भी नहीं भागेगा १ वाचक बोले ज्ञान वैराग यज्ञ तप दान आदिलेके और जो सुंदर कर्म तिन्हकर्मों करिके पुकारे हुये जो भगवान् सो जल्दी नहीं प्रकट होते २ परन्तु भगवान् को नाम लेके कोई पुकारता है तो भगवान् कैसा दौड़ते हैं जैसा वत्सके शब्द को सुनिकै गाय दौड़ती है इस वास्ते गजेन्द्र भगवान् को नाम लेकै पुकारा तब आपने नाम को सुनिकै भगवान् जल्दी दौड़ते भये ३ इति भा० अ० शं० मं० तृतीयेऽध्याये तृतीय वेणी ॥ ३ ॥ श्लो० ॥ ३० ॥

श्रोता पूछते भये अनेक तपस्वी जिन्हों को भगवान् बारंबार भेटते थे परन्तु वो तपस्वी लोग भगवान् के रूपमें नहीं प्राप्तभये और गजेंद्र भगवान्की देह जरासे छुइकै भगवान्

वाचक उवाच ॥ भक्तिम्प्रकुर्वतोविष्णोर्व्यतीताबहवो युगाः। गजेंद्रस्यचश्रोतारो व्यासेनोक्तन्नभूरिशः। अतः प्रापहरे रूपं गजेंद्रस्तपसात्ततः २ इतिश्रीभा० अ० शं०मं० चतुर्थेऽध्यायेचतुर्थवेणी ॥ ४ ॥ श्लो०॥ ६ ॥

श्रोतार ऊचुः ॥ शप्तस्सुरेशोमुनिनान त्रिलोकंमुनीश्वरः। निश्श्रीकंयज्ञहीनंच कथंतद्भवत्तदा १ वाचक उवाच ॥ मुनिशप्तेसहस्राक्षे बलिरिन्द्रोबभूवह। तस्मान्निशाचरैर्य्यज्ञास्सश्रीकाश्च विनाशिताः २ इति० भा० अ० शं० मंपंचमेऽध्यायेपंचमवेणी ५ श्लो०१६ ॥

के रूप में प्राप्त हो गया यह बड़े आश्चर्य की बात है वाचक बोले हे श्रोता हो गजेंद्र को तपस्या करते करते बहुत युग बीति गये परन्तु गजेंद्र की तपस्या को व्यास जी बहुत प्रकार से नहीं वर्णन किये तप बलसे गजेंद्र भगवान् के रूप को प्राप्त भया २ इति भा० अ० शं० मं० चतुर्थेऽध्याये चतुर्थ वेणी ॥ ४ ॥ श्लोक ॥ ६ ॥

श्रोता पूछते भये कि हे मुनि जी दुर्वासा मुनि ने अकेल इंद्र को शाप दिये थे कि हे इन्द्र तेरी लक्ष्मी नाश हो जायगी तथा तीन लोकको शाप नहींदियाथा तब तीन लोक फिरि लक्ष्मी से क्यों हीन हुआ १ वाचक बोले मुनि की शाप इंद्र को भई तब तीन लोकको राजा बलि होता भया इस कारण से तीनलोक को यज्ञ करिकै तथा लक्ष्मी करिकै राक्षस लोग हीन कर देते भये इस वास्ते तीन लोक यज्ञ करि के तथा लक्ष्मी करि कै हीन भया २ इति भा० अ० शं० मं० पंचमेऽध्याये पंचमवेणी ॥ ५ ॥ श्लो० १६ ॥

श्रोतार ऊचुः॥ हारनूपुरकेयूरवलयादिविभूषणाः।शि शुस्त्रियोरलंकारा धृताभगवताकथम् १ वाचक उवाच ॥ ब्रह्मादीनांसुराणांच बालरूपस्यवैहरेः। उपासनाप्रिया नित्य मतोबालविभूषणाम्। धृत्वाभूत्त्वाशिशुर्विष्णुस्तूर्णं माविर्भविष्यति २ इतिश्रीभा० श्र० शं०मं षष्ठेऽध्याये षष्ठवेणी॥ ६ ॥श्लो० ॥ १ ॥

श्रोतार ऊचुः ॥ सुरान्विमूर्च्छितान्दृष्ट्वा सर्पश्श्वास विषाग्निना। किंस्ववृषुर्घनाब्रह्मन् भगवद्वशवर्तिनः १ वाचक उवाच॥ कुमारौददतुश्शीघ्रं विषवीर्यहरान्रसा न्। तान्मिलित्वाजलेतूर्णंस्मेघावृष्टिम्प्रचक्रिरे २ इति० भा० श्र० शं० मं० सप्तमेऽध्याये सप्तमवेणी ॥ ७ ॥ श्लो० ॥ १५ ॥

श्रोता पूछते भये हे गुरुजी भगवान्‌ने हार तथा पायजेब तथा कंकन कुंडल कंगना आदि लेके बालक को तथा स्त्री को ऐसा गहना क्यों धारण करते भये १ वाचकबोले ब्रह्मा आदि देवतों को बालक रूप भगवान् की उपासना बड़ी प्यारी है इस वास्ते जल्दी बालकरूप होके तथा बालकको सब गहना धारण करके ब्रह्मादिकको दर्शन देते हैं इसवास्ते बालक को गहना धारण करते हैं २ इति भा० श्र० शं० मं० षष्ठेऽध्याये षष्ठवेणी ॥ ६ ॥ श्लोक ॥ १ ॥

श्रोता पूछतेभये हे गुरुजी सर्पके मुखकी श्वाससे निकला जो विष तिस विषकी अग्नि करिके मूर्च्छित जो देवता तिनको देखिके भगवान्‌की आज्ञा करनेवाले जो मेघ सो काहेकी वर्षा करते भये १ वाचक बोले जहरके वीर्यको नाशकरनेवाला रस अश्विनीकुमार वैद्य मेघोंको देतेभये उसी रसको मेघोंने

श्रोतार ऊचुः ॥ बभूवुर्दानिनस्सर्वेभूपाश्चैवयुगेयुगे। दीर्घायुषश्चार्थपूर्णेनतेषामुपमाकृता १ यथोपमाशुकेनैव कृताराज्ञःपरीक्षितः। सुरवृक्षार्थपूर्णेवै कथमेतद्गुरो वद २ वाचकउवाच ॥ न तु संसारिकार्थानामर्थिना मत्यर्थपूर्तये। उपमैषाप्रज्ञातव्या श्रीमद्भागवतार्थिनः। कथाप्रश्नर्द्धिनाचोक्तस्सुरवृक्षसमोनृपः ३ इतिश्रीभा० अ०शं०मं० अष्टमेऽध्यायेअष्टमवेणी॥ ८ श्लो० ६ ॥

जलमें मिलायके अकेले देवतोंके ऊपर जलकी वर्षा करते भये २ इति भा० अ० शं० मं० सप्तमेऽध्यायेसप्तमवेणी ७ श्लो० १५ ॥

श्रोता पूछतेभये सतयुग त्रेता द्वापरमें बड़े बड़े दानी राजा होतेभये जिनकी बड़ी आयुष होती भई परंतु सब प्राणियों की आशा पूरण करने में तिनकीभी ऐसी उपमा मुनियोंने नहीं किया १ जैसी उपमा याचकोंका मनोरथ पूरण करनेवास्ते शुकदेवजीने कल्पवृक्षकी उपमा परीक्षितकी किया ऐसी उपमा किसी राजोंकी नहींभई यहबड़ी शंकाहोतीहै शिघ्र ३।२ वाचक बोले संसारके सुखको जो याचना करनेवाले प्राणी उसकी आशा पूरण करने में यह उपमा मुनिने परीक्षितकी नहीं कियायह उपमातो जो कोई भागवत की याचना करतेहैं उन की याचना पूरण करने में परीक्षितको शुकदेवजी कल्पवृक्ष सरीके कहे हैं क्योंकि परीक्षित् राजा भागवत को सुनिकै पूंछि पूंछि बहुत कथाका विस्तार किया इसवास्ते कल्पवृक्ष की उपमा राजा परीक्षितको शुकदेवजीने दियेहैं ३इति भाग वत अष्टमस्कंधे शंकानिवारण मंजर्यां अष्टमेऽध्याये अष्टम वेणी ॥ ८ ॥ शलोक ॥ ६ ॥

श्रोतार ऊचुः ॥ वंचनेराक्षसानाम्वैधृता भागवता कथम्। अन्यरूपान्परित्यज्यनिन्दितास्वैरिणीतनुः १ चेत्तेषाम्मोहनार्थाय तथापिमाययान्यथा २ वाचक उवाच ॥ भगवान्नारदंचक्रेसुंदरीम्प्रमदाम्पुरा। बहुवर्ष सहस्राणिव्यतीतानिमुनेस्सदा ३ मायामुक्तश्चतंशेपत्व मप्येवम्भविष्यसि। अतोधृताचहरिणानिंदितास्वैरि णीतनुः ४ इति भा० अ० शं० मं० नवमेऽध्याये नवमवेणी॥ ९ ॥ श्लोक ॥ ९ ॥

श्रोतार ऊचुः ॥ नप्रापुश्चामृतंसर्वेवासुदेवपराङ्

श्रोता पूछते भये राक्षसों को छलनेवास्ते भगवान् सब रूप त्यागिके संसार में बड़ी निंदायोग्य वेश्याको शरीर क्यों धारण करते भये १ जो कोई कहौकि राक्षसों को मोहने वास्ते माया करिकै वेश्या भये तौभी अन्याय है क्योंकि दूसरे रूप करिकै राक्षसों को न मोह करि सक्ते थे भगवान् बड़े बड़े महात्मों को मोहकरि देतेहैं तौ राक्षसों के मोहकरने में क्या कठिनथा २ वाचक बोले सतयुग में भगवान् नारद मुनिको माया करिकै स्त्री बनाय दिया देवीभागवतमें लिखा है तब नारद को स्त्रीभये बहुत हजारों वर्ष बीतिगये ३ नारद मायासे छूटिगये तब पुरुष रूपहोकै भगवान् को शाप देते भये कि हे भगवन् तुम हमेसरीके कभी स्त्रीरूप होजावोगे हे श्रोताहो इसवास्ते भगवान् वेश्या को शरीर धारण करतेभये ॥ ४ ॥ इतिश्री भा० अ० शं० मंजर्य्यांनवमेऽध्याये नवमवेणी ॥ ९ ॥ श्लोक ॥ ९ ॥

श्रोता पूछतेभये कि हेगुरुजी राक्षसतो भगवान्के वैरीथे

मुखाः। दितिजाविष्णुभक्तश्चकथन्नप्राप्तवान्बलिः १ वाचक उवाच ॥ अमृतस्यबलेर्नेच्छाराजधर्म्मान्समी क्ष्यच। कुलधर्म्मान्ज्ञातिधर्मानतस्तेनेदमाकृतम् २इति श्री भा० अ० शं०मं० दशमे ऽध्यायेदशमवेणी॥१०॥ श्लोक॥ १॥

श्रोतार ऊचुः॥ यदामृतासुराञ्छुक्रोजीवयेद्विद्यास्वया। तदातेषांकथंनाशोभविष्यतिसुरात्मनाम् १ वाचक उवाच॥ यावत्तेजोराक्षसानामधिपस्यप्रवर्तते।

इसवास्ते वह अमृतको नहीं पाये परन्तु बलि राजा तो भगवान्को भक्तथा इसवास्ते वो अमृत क्यों नहींपाया यह बड़ा भ्रम होताहै १ वाचक बोले अमृत लेनेकी इच्छा बलिराजा को नहींथी जो कोई कहै कि अमृत लेनेकी इच्छा नहींथी तो यह काम क्यों किया उत्तर राजाको धर्म देखिकै कि राजाको सबकामकी परीक्षा लेना चाहिये तथा जाति धर्म देखिकै जातिकी आज्ञा बलि न मानता तौ जाति नाराज होजाते. इसवास्ते यह काम बलिने किया तथा बलिको अमृत नहीं प्राप्त हुआ २ इति भा० अ० शं० मं० दशमेऽध्याये दशम वेणी॥ १०॥ श्लोक॥ १॥

श्रोता पूछते भये शुक्रजी मरेहुये राक्षसों को अपनी विद्या करिकै जिआय देतेथे तब राक्षसोंका नाशकैसाहोताथा१ वाचक बोले जबतक राक्षसों के मालिक के तेजकी वृद्धि रहती थी तब शुक्राचार्य राक्षसोंको जीताकरि सक्तेथे जब राक्षसों के मालिक को तेजनष्ट होजावैगा तब शुक्राचार्य्य राक्षसोंको कभी भी नहीं जिआय सकैंगे क्योंकि समयके प्रताप को

तावज्जीवयतेदैत्यान्तद्विनष्टेनसः नमः २ इति भा० अ० शं० मं० एकादशेऽध्यायेएकादशवेणी ॥ ११० ॥ श्लोक ॥ ४७ ॥

श्रोतार ऊचुः ॥ कोमहाभगवाञ्छम्भुः कथंकामवशोभवत् । एषानो महतीशंका छिन्ध्याचार्यवचोसिना १ वाचकउवाच ॥ युगानाम्बहुसाहस्रं मायाचक्रे तपःपरम् । शिवेनोक्तावरम्ब्रूहि तयोक्तस्त्वंवशीभव २ शिवेनोक्तपुनर्माया नशैकम्वशगस्तव। भविष्यामिचश्रोतारश्चातःकामवशोभवत् ३ इतिश्रीभा०अ० शं० मं० द्वादशेऽध्यायेद्वादशवेणी १२ ॥ ॥ श्लो० ॥ २७ ॥

भगवान् भी मानते हैं तो शुक्की क्या बात है॥ २ ॥ इति० भाग०अ०शं०मं०एकादशेऽध्यायेएकादशवेणी११श्लोक४७॥

श्रोता पूछते भये महादेव कामके नाश करने वाले हैं फिरि भगवान्को स्त्रीरूप देखिके कामकी वश क्यों होगये यह हमारे लोगों को बड़ी शंका है हे गुरुजी आप अपने बचन रूप तरवारि करिके इस शंकाको काटो १ वाचक बोले अनेक हजारों युग(नमःशिवाय)इसमंत्रको जपिके मायातप करती भई तब एक दिन शिवजी बोले हे माया जो वर तेरेको चाहै सो माँगु तब माया बोली हे शंकर तीन लोकमें जो देहधारी प्राणी तथा देवता विष्णु ब्रह्मा आदिलेके सब मेरे वश हैं एक आपु मेरे वश नहीं हो सो आधी घड़ी के वास्ते आपुभी वशि हो जावो २ शिवजी माया से कहेकि क्षण १ तेरी वश हम रहैंगे हे श्रोताहो इसवास्ते शंकर काम के वश भये हैं कुछु कामी होके कामके वश नहीं भये ३ इतिभा०अ०शं०मं० द्वादशऽध्याये द्वादशवेणी१२श्लोक२७ ॥

श्रोतार ऊचुः ॥प्रभाकरसुतश्श्रीमान् सावर्णेरनुजः शनिः। कथम्पीडांकरोत्यस्य सततंजगतःप्रभो१वाचक उवाच॥ज्ञात्वोन्मत्तंत्रिभुवनं वरंलब्ध्वापितामहात्।तेषा म्मदविनाशाय शनिःपीडांकरोतिवै २ इति भा० अ० शं० मं०त्रयोदशेऽध्यायेत्रयोदशवेणी॥१३॥श्लो० १०॥

श्रोतार ऊचुः ॥ ग्रस्तान्पश्यन्नृषयो वेदान्कालेनभो गुरो। चतुर्युगान्तेकिंस्याद्वैफलन्तेषाम्प्रदर्शने १ वाचक उवाच॥वेदानांयावदुत्पत्तिः पुनश्चैवभविष्यति।तावत्स मीक्ष्यमुनयो वेदधर्मंचतुर्विधम् २ कथयान्तिमनुष्येभ्यो धर्म्मालोपोभवेद्ध्रुवम्। एतदर्थम्प्रपश्यन्ति ग्रस्तान्वे

श्रोता पूछते भये शनिश्चर सूर्य के तो पुत्र तथा सावर्णि मनु के छोटे भाई ऐसे कुल के वंश होके फिरि नित्य संसार को दुःख क्यों देते हैं १ वाचक बोले तीन लोक को उन्मत्त शनिश्चर देखिकै बिचार किये कि सब प्राणी अभिमान करि कै ईश्वरको भूलि गये ऐसा शनिजी विचारि कै ब्रह्मा से बर दान लैकै उन्मत्त जो जीव तिन को अभिमान नाश करने वास्ते दुष्ट जीवों को दुःख देते हैं और जो सज्जन हैं उन को नहीं दुःख देते २ इति भा अ० शं० निवारण मंजर्यां त्रयोदशेऽध्यायेत्रयोदशवेणी ॥ १३ ॥ श्लोक ॥ १० ॥

श्रोता पूछते भये हे गुरुजी चारियुगके अन्त में काल करि कै ग्रसित हुआ जो वेद तिनको ऋषिलोग देखतेहैं परन्तु तिन ऋषियोंके देखने में क्या फल हुआ १ वाचकबोले जब तक चारि वेदों की उत्पत्ति फिर होवैगी तब तक ऋषियोंने वेदमें से चारों युगके धर्मको देखिकै २ मानुष्योंको कहते हैं मानुष्यलोग सुनिकै धर्मको नाशनहीं करते जबऋषियोंसे मनुष्यलोग धर्म नहींसुनैं

दान्मुनीश्वराः ३ इतिश्रीभा०अ० शं० मं० चतुर्दशेऽध्यायेचतुर्दशवेणी ॥ १४ ॥ श्लो० ॥ ४ ॥

श्रोतार ऊचुः ॥ विनाशताश्वमेधेन कृतेनेन्द्रासनं मुने। नरेणाधिष्ठितंकश्चिन्न श्रुतंशास्त्रसंचये १ इन्द्रो वशीकृतस्सर्वैं राक्षसैरसकृच्छ्रुतम्। कथंशुक्रार्च्चनेनैव बलिःप्राप्तस्तदासनम् २ वाचक उवाच ॥ रेमेऽहिल्यांसहस्राक्षोयद्दिनेकामतापितः। तद्दिनेषष्ठिमेधस्य फलन्नष्टंबभूवह ३ चत्वारिंशावशिष्टंचाहिरण्यकशिपुस्तदा। तस्थौतदासनेपश्चाद्बलिनाधिष्ठितंचतत्। यथापुण्यन्तथाविष्णुस्सहायंकुरुतेसदा ४ इतिभा०अ० शं०मं०पंचदशेऽध्यायेपंचदशवेणी॥१५॥श्लो०॥३३॥

तब वेद तो उस वखत थे नहीं नष्ट हो जाते हे श्रोता हो इस वास्ते ग्रसित हुये वेदों को ऋषिलोग देखते हैं ३ इति भा० अ० शं० मं० चतुर्दशेऽध्याये चतुर्दश वेणी ॥ १४॥श्लो० ४ ॥

श्रोता पूछतेभये जो मनुष्य तथा जीव अश्वमेध यज्ञ नहीं करते सो प्राणी इन्द्र नहीं कभीहोता बिना इन्द्र भये इन्द्र की गादीपर क्यों बैठेगा ऐसा हमने सब शास्त्र में सुनाहै १ तथा ऐसाभी हम सुना है कि अनेक दफे राक्षसों ने इन्द्रको अपने अख्तियार में करि लियेहैं परंतु यह बड़ी शंका भई कि अकेले शुक्र को पूजन करिकै बलिने इन्द्र कोराज छीनि लिया तथा इन्द्रकी गादीपर बैठगया बिना अश्वमेध किये २ वाचक बोले जिस दिन अहिल्याके संग इन्द्रने खोटा कर्म किया उसी वखत ६० यज्ञकी पुण्य नष्ट होगई ३ चालीस ४० अश्वमेधको पुण्य इंद्रके पासरही तब हिरण्यकशिपु इन्द्रके आसनपर बैठताभया तिसके पीछे बलि बैठताभया जैसी

श्रोतार ऊचुः ॥ स्त्रीणान्नैवाधिकारोस्तिवेदमंत्रेषु कर्हिचित्। अदितिंकश्यपःप्रोचेनाग्नयश्चहुतास्त्वया कुत्रचिन्मयिसंप्राप्तेशंकेयम्महतीचनः १ वाचकउवाच प्रोषितेस्वपतौबालातद्धोमविघ्नशान्तये।जुहुयात्स्वपते र्नाम्ना धर्मशास्त्रमतेनच। ज्ञात्वैवंकश्यपः प्रोचेस्वप्रियामादितिम्मुनिः २ इति भा० अ० शं० नि० मं० षो डशेऽध्याये षोडशवेणी ॥ १६ ॥ श्लो० ॥ ९ ॥

इंद्रकी पुण्य तिसप्रकार इंद्रकी रक्षा भगवान् करते भये हे श्रोताहो इसवास्ते बिना अश्वमेध किये बलिने इन्द्रका राज छीनि लिया ४ इति भा० अ० शं० मं० पंचदशेऽध्याये पंच- दशवेणी १५ श्लोक ३३ ॥

श्रोता पूछतेभये अदिति से कश्यपमुनि कहेथे कि हे प्रिये हम किसी दूसरे ग्रामको चलेगयेथे तब तुमने अग्निमें होम नहींकिया इसवास्ते उदासीन बैठीहो हे गुरुजी बिना वेदमंत्रों सेतौ होम होवैगा नहीं और वेदोंको मंत्र पढ़नेको स्त्रियोंको अधिकार भी नहीं है तौ फिरि ऐसा वाक्य कश्यपमुनि क्यों कहे थे यहशंका हमारे सबके मनमें है १ बाचक बोले प्रायश्- चित्त कदंब श्लोक लक्ष १००००० तथा बिधान पारिजातक लक्ष १००००० श्लोक तथा अष्टादशस्मृति श्लोक ५२००० इन आदि लेकै और जो अनेक बड़े २ धर्मशास्त्रहैं तिन धर्म शास्त्रों में ऐसा लिखाहै कि जो स्त्रीको पति मास १ के वास्ते दूसरे ग्रामको चलाजावे तथा अपनी अग्निहोत्रकी अग्नि आदि सामग्री न लैजावै तब अपने पतिके नामको मंत्र मानिकै उसी नामसेस्त्री होमकरिदेवै पतिके होमको विघ्न न होनेपावै ऐसा धर्मशास्त्रों को मत जानिकै कश्यपमुनि अदिति से पूंछेहैं २॥इतिभा०अ०शं०नि०मंज०षोड़शेऽध्यायेषोड़शवेणीश्लोक९॥

श्रोतार ऊचुः॥ महदाश्चर्यमेतद्धिवीर्य्यमाधत्तकश्यपः। अदित्यांविष्णुसूत्यर्थं विना वीर्य्यन्नतज्जनिः १ वाचकउवाच॥सहित्वानेकदुःखानिमर्य्यादांस्वकृतांहरिः सदैवरत्ततेऽतोवैवीर्य्यसृष्टिप्ररक्षणात् । वीर्य्याश्रयंसमाश्रित्यस्वाविर्भावंकरोतिसः २ इतिभा० अ० शं० मं सप्तदशेऽध्यायेसप्तदशवेणी ॥ १७ ॥ श्लो० ॥ २३ ॥

श्रोतार ऊचुः॥ युगत्रयेदधुर्दानंयाचिताश्चनृपाद्विजैः। तथापिगुरुमापृष्ट्वाविचार्य्यशतधापुनः १ तत्कथन्दातुमुद्युक्तस्स्तेनायाचितोबलिः २ वाचक उवाच॥

श्रोता पूछते भये हे गुरुजी भगवान् के जन्म होने वास्ते अदितिके शरीरमें कश्यप मुनि वीर्य्य स्थापन करते भये यह बड़ी शंका होती है कि बिनावीर्य्य स्थापन किये भगवान् को जन्म नहीं होता क्योंकि वीर्यको जन्म तौ चौरासीलक्ष योनिको होताहै और भगवान् तौ सर्वव्यापी हैं उनके जन्म होने वास्ते वीर्यस्थापन को क्या कामथा १ बाचक बोले भगवान् अनेक प्रकारको दुःख सहिकै आपनीबनाई मर्यादाकी रक्षाकरते हैं यहबात शास्त्र में लोक में भी सबको जाहिर है वीर्य बिना संसारकी उत्पत्ति नहीं होती इसवास्ते वीर्य्य की मर्यादा की रक्षाकरने वास्ते वीर्य करिकै आपु प्रगट होतेहैं जो वीर्यकी मर्यादा तथा अपनी बनाई आपही मर्यादा न राखैं तौ सब वस्तुमें विराज मानहै फिरिजन्म लेनेका क्या काम है बैकुंठ में बैठ बैठे जो चाहैसो करिलेवै इसवास्ते कश्यप वीर्य स्थापन अदिति में करते हुये२इतिश्रीभा०अ०शं०मं०सप्तदशेऽध्यायेसप्तदशवेणी १७॥ श्लो० ॥२१॥

श्रोता पूछतेभये हेगुरुजी सतयुगत्रेता द्वापरमें ब्राह्मण राजों

गृहस्थैर्य्याचितोदानंसन्दद्याद्ब्राह्मणेनृपः। अयाचितोविरक्तैश्चधर्म्मशास्त्रमतान्त्विदम्। अयाचितोवलिश्चैव ज्ञात्वादातुंसमुद्यतः ३ इतिभा० श० शं० मं० अष्टादशेऽध्याये अष्टादशवेणी ॥ १८ ॥ श्लो० ॥ ३२ ॥

श्रोतार ऊचुः ॥ ब्रह्मचारीस्वयम्भूत्वातथाऽप्यनृतवादनम्। चकारवामनोब्रह्मन्महत्कौतूहलं च नः १ वाचक उवाच ॥ शठंकर्म्मसदाकुर्य्याच्छठेनधर्मशास्त्र

से दान मांगतेथे तब राजालोग गुरु से अनेक वार पूंछिकै सुपात्र तथा कुपात्र विचारिकै दान देतेथे १ जब ऐसे विचारिकै दान देतेथे तब बामन भगवान्‌तौ बलिसे दान मांगा नहीं विना मांगे दान देनेको बलि क्यों तैयार हुआ यह भ्रमहै २ वाचक बोले धर्मशास्त्रको यह मत है कि गृहस्थ ब्राह्मण दान मांगै तब राजा दान देवै तथा विरक्तब्राह्मण दान न मांगै तौ भी राजा दान देवै ऐसा धर्मशास्त्रके मतको राजा बलि जानिकै बामन विरक्तहै कुछु मांगे भी नहीं तौ भी बलि दान देनेको तैयार भया ३ इति० भा० श० शं मं अष्टादशेऽध्यायेऽष्टादशवेणी ॥ १८ ॥ श्लो० ॥ ३२ ॥

श्रोता पूछतेभये हेगुरुजी हमारे सबके मनमें बड़ा आश्चर्य होताहै कि बामन भगवान् होकै तथा ब्रह्मचारी होकै थोरेही कामके वास्ते झूठ बोलते भये हरहर ३ हे गुरुजी क्या बलिको दण्ड देनेको दूसरा उपाय नहीं था वाचक बोलेकि धर्म्मशास्त्र में ऐसा लिखा है कि दुष्टके संग जो दुष्टता करैगे उनको दोष नहीं होता राजा बलि कैसा दुष्टहै कि वह अपने मन में जानताथा कि इन्द्र की पुण्य अभीहै हम राज लेलेवैगे किसी

नम् । शुक्रंपूज्यादद्देराज्यमिंद्रस्यचशठोबलिः २ इन्द्रो बलिसदाविष्णुंपुण्यशेषंचदेहिमे । अतोभगवतेदम्बैकृतंकर्म्मविनिंदितम् ३ इतिभा० अ० शं० नि० मंजय्यां एकोनविंशेऽध्याये एकोनविंशवेणी ॥ १९ ॥श्लो० १६ ॥

श्रोतार ऊचुः ॥ कोग्रहोमुनिभिः प्रोक्तः कथितोयत्पतिर्बलिः । इंद्रासनेसमास्थित्वाकथंगृहपतिःस्मृतः १ वाचक उवाच॥ येग्रह्लंतिसदाप्रीत्याभगवन्नामसादरम् ।

प्रभाव से तब भगवान् को दुःख भोगना परैगा ऐसा जानता रहा है तौभी शुक्रको पूजन करिकै इन्द्रको राज लेलिया २ तब राज से भ्रष्ट इन्द्र भगवान् से नित्य तगादा करनेलगा कि महाराज मैं अश्वमेधयज्ञ १०० कियाहों तब मेरेको आपु इन्द्र बनाये हो कुछु फोकट से नहीं बनाये सो १०० यज्ञमें जो मैंराज किया सोतो भोगिलिया अब जो मेरी बाकी पुण्य होवै उस पुण्य करिकै मेरा राज देवो और न राज देवो तो मेरी पुण्य देवो हे श्रोताहो ऐसे इन्द्र के वचन सुनिकै भगवान् लज्जा तथा दुःख को प्राप्त होके विचार किये कि विना छल किये बलिसे इन्द्रको राज नहीं मिलैगा ऐसा विचारिकै झूठ बोलिकै इन्द्रको राज देते भये ३ भा० अ० शं० मं० एकोनविंशेऽध्याये एकोनविंशवेणी १९ ॥ श्लोक ॥ १६ ॥

श्रोता पूछते भये शुकदेवजीने राजा बलिको घरको पति करिकै वर्णन किये हे गुरुजी घर किसका नाम है कि बलि राजा इन्द्रकी गादी पर बैठिकै तीन लोकको पति होकै फिरि गृहपति कहाया ऐसा उत्तम चीज गृह क्या है १ बाचक बोले जो जीव नित्य भगवान् को नाम बड़े आदरसे बड़ी प्रीति से जपते हैं जप करने को ग्रहण करना भी नाम है उन जीवोंको

ते गृह्वा मुनिभिः प्रोक्तास्तेषामुक्तोपतिर्बलिः ॥ २ ॥
इतिश्रीभा० अ० शं० मं विंशेऽध्याये विंशवेणी॥ २० ॥
श्लो० ॥ १ ॥

श्रोतार ऊचुः ॥ बलिश्चवामनेनोक्तो विशत्वंनिरयं सदा। पश्चात्सुतलमित्युक्तः कथन्तन्नददौहरिः १वाचक उवाच ॥ यदूचेवामनस्तत्र निरयम्मलयेददौ। अयसो

गृहनाम हैं तिन्हों को पति बलिहै क्योंकि० राति दिन बलि सरीके भगवान्के नामका जप करनेवाला कोईभी नहींहै इस वास्ते शुकदेवजी बलिको गृहपति कहेहैं घरको पति नहीं कहे२ इति भा० अ० शं० मं० विंशेऽध्याये विंशवेणी ॥ २० ॥ श्लोक ॥ १ ॥

श्रोता पूछते भये वामन भगवान् पेश्तर तो बलिको कहे थे कि तूं नरक में वास करु ऐसा पापी है तूं फिरि पीछे सुतललोक बलिको देते भये नरक को क्यों नहीं भेजे पामर जीव सरीके यह तमाशा किया जैसा कोई क्रोधी मनुष्य क्रोध भये पर जो चाहै सो मुख से बकिदेवै यह बड़ी शंका है १ वाचक बोले वामन भगवान् जो लोक बलिको देने वास्ते कहे थे सोई लोक दिये क्योंकि निरयको अर्थ नरकनहीं है तथा जो लोक अयस जो लोह तिस करि के निकहे रहित होवै याने जिस लोक में लोह न होवै उस लोक को भी मुनि यों ने निरय कहा है भगवान् भी निरयको अर्थ ऐसा करि के बलिको कहे थे कि निरयमें वास करोगे इस वास्ते निरय जो सुतल लोक तहां बलिको भेजिदिये क्यों कि सुतल आदि लोकोंमें मणि सिवाय दूसरी धातु कोई नहीं है और लोह

निर्गतंलोकान्निरयंसंस्मृतोबुधैः २ इतिश्री भा० अ०शं० मं० एकविंशेऽध्यायेएकविंशवेणी॥ २१॥ श्लो०॥ ३२॥
श्रोतार ऊचुः॥ बलिः कस्मात्संस्थानं यद्दुःप्राप्यं सुरैरपि। स्वर्गस्सुराणांसुतलो नागानामालयंसदा १ वाचक उवाच॥ जीवन्मुक्तःकृतोराजा वामनेनचतद्दशो।यल्लोकंयोगिनोयान्तितल्लोकंप्रापितोबलिः२ इतिश्री भा०अ०शं०मं०द्वाविंशेऽध्या०द्वाविंशवेणी २२श्लो०३७॥
श्रोतार ऊचुः॥ जगत्कर्तुर्जगद्भर्तुर्जगत्पालयितु

की कौन गनती है श्रोताहो निरयको अर्थ विचारिके वामन कहैथे नरक में पड़ने को बलिको नहीं कहेथे इ० भा० अ० शं० मं० एकविं० एकविंशवेणी ॥२१॥श्लो० ३२। से ३४ तक॥
श्रोता पूछते भये हे गुरुजी ऐसा कौनलोक है कि जिस लोकको देवताभी बड़े क्लेश से जासक्ते हैं और उसी लोक को एकक्षणमें बलिराजा चला गया जो कदापि स्वर्ग लोक को चलिगया तौ स्वर्ग लोक देवतोंकाहै औरजो सुतलको गयातौ सुतल नागोंका है हेगुरुजी यह बड़ी शंका है १ वाचक बोले वामन भगवान् जिस वखत बलिसे दानलिया उसीवखत बलिजीताथा तोभी संसारसे मोक्ष करिदिया चाहे तौ संसार में रहै चाहे योगीके लोकको जावै ऐसे लोकको देवता लोग बड़े दुःखसे भी नहीं जासकैंगे इसवास्ते शुकजी कहेकि जिसलोकको बलि प्राप्त भयासो लोक देवतों से दुःख से भी नहीं जावे योग्य है२इति भा०अ०शं०मं०द्वाविंशे० द्वाविंश वेणी॥ २२॥ श्लो० ३७॥
श्रोता पूछते भये जगत् को करने वाले जगत् को स्वामी जगत् की पालना करने वाले ऐसे जो भगवान् तिन भगवान्

स्तथा। इन्द्रस्याधःकथंचक्रथभिषेकंपितामहः१वाचक उवाच॥ इन्द्रस्यत्रासनार्थाय लघुत्वेस्थापितोहरिः। विचार्य्यविधिनासम्यक् प्रेरितेनचविष्णुना २ इतिश्री भा० श० शं० मं० त्रयोविंशोऽध्यायेत्रयोविंशवेणी २३॥ श्लो०॥ २१॥

